श्रीमद्भागवतपुराणम्

Śrīmad Bhāgavata Purāṇa

Second Canto

Text Only

Version 0.1

April 1, 2001

Contents

1	महापुरुषसंस्थानुवर्णनम् १	5
2	महापुरुषसंस्थानुवर्णनम् २	7
3	महापुरुषसंस्थानुवर्णनम् ३	11
4	महापुरुषसंस्थानुवर्णनम् ४	13
5	महापुरुषसंस्थानुवर्णनम् ५	15
6	ब्रह्मनारदसंवादे पुरुषविभूतिवर्णनम्	17
7	ब्रह्मनारदसंवादः	21
8	परीक्षित्प्रश्नः	25
9	भागवतप्रवृत्तिः	27
10	दशलक्षणकथनम्	31

Chapter 1

महापुरुषसंस्थानुवर्णनम् १

0201001 श्रीशुक उवाच
02010011 वरीयान् एष ते प्रश्नः कृतो लोकहितं नृप
02010013 आत्मवित्सम्मतः पुंसां श्रोतव्यादिषु यः परः
02010021 श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः
02010023 अपश्यताम् आत्मतत्त्वं गृहेषु गृहमेधिनाम्
02010031 निद्रया ह्रियते नक्तं व्यवायेन च वा वयः
02010033 दिवा चार्थेहया राजन् कुटुम्बभरणेन वा
02010041 देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि
02010043 तेषां प्रमत्तो निधनं पश्यन्न् अपि न पश्यति
02010051 तस्माद्भारत सर्वात्मा भगवान् ईश्वरो हरिः
02010053 श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयम्
02010061 एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया
02010063 जन्मलाभः परः पुंसाम् अन्ते नारायणस्मृतिः
02010071 प्रायेण मुनयो राजन् निवृत्ता विधिषेधतः
02010073 नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः
02010081 इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्
02010083 अधीतवान् द्वापरादौ पितुर्द्वैपायनादहम्
02010091 परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया
02010093 गृहीतचेता राजर्षे आख्यानं यदधीतवान्
02010101 तदहं तेऽभिधास्यामि महापौरुषिको भवान्
02010103 यस्य श्रद्दधताम् आशु स्यान् मुकुन्दे मतिः सती
02010111 एतन् निर्विद्यमानानाम् इच्छताम् अकुतोभयम्

02010113 योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम्
02010121 किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह
02010123 वरं मुहूर्तं विदितं घटते श्रेयसे यतः
02010131 खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्ताम् इहायुषः
02010133 मुहूर्तात् सर्वम् उत्सृज्य गतवान् अभयं हरिम्
02010141 तवाप्येतर्हि कौरव्य सप्ताहं जीविताविधिः
02010143 उपकल्पय तत् सर्वं तावद्यत् साम्परायिकम्
02010151 अन्तकाले तु पुरुष आगते गतसाध्वसः
02010153 छिन्द्यादसङ्गशस्त्रेण स्पृहां देहेऽनु ये च तम्
02010161 गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः
02010163 शुचौ विविक्त आसीनो विधिवत् कल्पितासने
02010171 अभ्यसेन् मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्
02010173 मनो यच्छेज् जितश्वासो ब्रह्मबीजम् अविस्मरन्
02010181 नियच्छेद्विषयेभ्योऽक्षान् मनसा बुद्धिसारथिः
02010183 मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया
02010191 तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा
02010193 मनो निर्विषयं युक्त्वा ततः किञ्चन न स्मरेत्
02010195 पदं तत् परमं विष्णोर्मनो यत्र प्रसीदति
02010201 रजस्तमोभ्याम् आक्षिप्तं विमूढं मन आत्मनः
02010203 यच्छेद्धारणया धीरो हन्ति या तत्कृतं मलम्
02010211 यस्यां सन्धार्यमाणायां योगिनो भक्तिलक्षणः
02010213 आशु सम्पद्यते योग आश्रयं भद्रम् ईक्षतः
0201022 राजोवाच
02010221 यथा सन्धार्यते ब्रह्मन् धारणा यत्र सम्मता
02010223 यादृशी वा हरेदाशु पुरुषस्य मनोमलम्
0201023 श्रीशुक उवाच
02010231 जितासनो जितश्वासो जितसङ्गो जितेन्द्रियः
02010233 स्थूले भगवतो रूपे मनः सन्धारयेद्धिया
02010241 विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम्
02010243 यत्रेदं व्यज्यते विश्वं भूतं भव्यं भवच् च सत्
02010251 अण्डकोशे शरीरेऽस्मिन् सप्तावरणसंयुते
02010253 वैराजः पुरुषो योऽसौ भगवान् धारणाश्रयः
02010261 पातालम् एतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम्
02010263 महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जङ्घे
02010271 द्वे जानुनी सुतलं विश्वमूर्तेर् ऊरुद्वयं वितलं चातलं च
02010273 महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणन्ति

02010281 उरःस्थलं ज्योतिरनीकम् अस्य ग्रीवा महर्वदनं वै जनोऽस्य
02010283 तपो वराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः
02010291 इन्द्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रम् अमुष्य शब्दः
02010293 नासत्यदस्रौ परमस्य नासे घ्राणोऽस्य गन्धो मुखम् अग्निरिद्धः
02010301 द्यौरक्षिणी चक्षुरभूत् पतङ्गः पक्ष्माणि विष्णोरहनी उभे च
02010303 तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्यम् आपोऽस्य तालू रस एव जिह्वा
02010311 छन्दांस्यनन्तस्य शिरो गृणन्ति दंष्ट्रा यमः स्नेहकला द्विजानि
02010313 हासो जनोन्मादकरी च माया दुरन्तसर्गो यदपाङ्गमोक्षः
02010321 व्रीडोत्तरौष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठम्
02010323 कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसङ्घाः
02010331 नाड्योऽस्य नद्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेन्द्र
02010333 अनन्तवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्म गुणप्रवाहः
02010341 ईशस्य केशान् विदुरम्बुवाहान् वासस्तु सन्ध्यां कुरुवर्य भूम्नः
02010343 अव्यक्तम् आहुर्हृदयं मनश्चस चन्द्रमाः सर्वविकारकोशः
02010351 विज्ञानशक्तिं महिम् आमनन्ति सर्वात्मनोऽन्तःकरणं गिरित्रम्
02010353 अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशे
02010361 वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः
02010363 गन्धर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः
02010371 ब्रह्माननं क्षत्रभुजो महात्मा विड्रुरुरङ्घ्रिश्रितकृष्णवर्णः
02010373 नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः
02010381 इयान् असावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते
02010383 सन्धार्यतेऽस्मिन् वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किञ्चित्
02010391 स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः
02010393 तं सत्यम् आनन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः

Chapter 2

महापुरुषसंस्थानुवर्णनम् २

0202001 श्रीशुक उवाच
02020011 एवं पुरा धारणयात्मयोनिर् नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात्
02020013 तथा ससर्जेदम् अमोघदृष्टिर् यथाप्ययात् प्राग् व्यवसायबुद्धिः
02020021 शाब्दस्य हि ब्रह्मण एष पन्था यन् नामभिर्ध्यायति धीरपार्थैः
02020023 परिभ्रमंस्तत्र न विन्दतेऽर्थान् मायामये वासनया शयानः
02020031 अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः
02020033 सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः
02020041 सत्यां क्षितौ किं कशिपोः प्रयासैर् बाहौ स्वसिद्धे ह्युपबर्हणैः किम्
02020043 सत्यञ्जलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः
02020051 चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
02020052 नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्
02020053 रुद्धा गुहाः किम् अजितोऽवति नोपसन्नान्
02020054 कस्माद्भजन्ति कवयो धनदुर्मदान्धान्
02020061 एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवान् अनन्तः
02020063 तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र
02020071 कस्तां त्वनादृत्य परानुचिन्ताम् ऋते पशून् असतीं नाम कुर्यात्
02020073 पश्य’ जनं पतितं वैतरण्यां स्वकर्मजान् परितापा’ जुषाणम्
02020081 केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्
02020083 चतुर्भुजं कञ्जरथाङ्गशङ्ख गदाधरं धारणया स्मरन्ति
02020091 रसन्नवक्त्रं नलिनायतेक्षणं कदम्बकिञ्जल्कपिशङ्गवाससम्
02020093 लसन्महारत्नहिरण्मयाङ्गदं स्फुरन्महारत्नकिरीटकुण्डलम्
02020101 उन्निद्रहृत्पङ्कजकर्णिकालये योगेश्वरास्थापितपादपल्लवम्

02020103 श्रीलक्षणं कौस्तुभरत्नकन्धरम् अम्लानलक्ष्म्या वनमालयाचितम्
02020111 विभूषितं मेखलयाङ्गुलीयकैर् महाधनैर्नूपुरकङ्कणादिभिः
02020113 स्निग्धामलाकुञ्चितनीलकुन्तलैर् विरोचमाननहासपेशलम्
02020121 अदीनलीलाहसितेक्षणोल्लसद् भ्रूभङ्गसंसूचितभूर्यनुग्रहम्
02020123 ईक्षेत चिन्तामयम् एनम् ईश्वरं यावन् मनो धारणयावतिष्ठते
02020131 एकैकशोऽङ्गानि धियानुभावयेत् पादादि यावद्धसितं गदाभृतः
02020133 जितं जितं स्थानम् अपोह्य धारयेत् परं परं शुद्ध्यति धीर्यथा यथा
02020141 यावन् न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः
02020143 तावत् स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत
02020151 स्थिरं सुखं चासनम् आस्थितो यतिर् यदा जिहासुरिमम् अङ्ग लोकम्
02020153 काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन् मनसा जितासुः
02020161 मनः स्वबुद्ध्यामलया नियम्य क्षेत्रज्ञ एतां निनयेत् तम् आत्मनि
02020163 आत्मानम् आत्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात्
02020171 न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे
02020173 न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम्
02020181 परं पदं वैष्णवम् आमनन्ति तद् यन् नेति नेतीत्यतदुत्सिसृक्षवः
02020183 विसृज्य दौरात्म्यम् अनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे
02020191 इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरन्धिताशयः
02020193 स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज् जितक्लमः
02020201 नाभ्यां स्थितं हृद्यधिरोप्य तस्माद् उदानगत्योरसि तं नयेन् मुनिः
02020203 ततोऽनुसन्धाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत
02020211 तस्माद्भ्रुवोरन्तरम् उन्नयेत निरुद्धसप्तायतनोऽनपेक्षः
02020213 स्थित्वा मुहूर्तार्धम् अकुण्ठदृष्टिर् निर्भिद्य मूर्धन् विसृजेत् परं गतः
02020221 यदि प्रयास्यन् नृप पारमेष्ठ्यं वैहायसानाम् उत यद्विहारम्
02020223 अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन् मनसेन्द्रियैश्च
02020231 योगेश्वराणां गतिम् आहुरन्तर् बहिस्त्रिलोक्याः पवनान्तरात्मनाम्
02020233 न कर्मभिस्तां गतिम् आप्नुवन्ति विद्यातपोयोगसमाधिभाजाम्
02020241 वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन शोचिषा
02020243 विधूतकल्कोऽथ हरेरुदस्तात् प्रयाति चक्रं नृप शैशुमारम्
02020251 तद्विश्वनाभिं त्वतिवर्त्य विष्णोर् अणीयसा विरजेनात्मनैकः
02020253 नमस्कृतं ब्रह्मविदाम् उपैति कल्पायुषो यद्विबुधा रमन्ते
02020261 अथो अनन्तस्य मुखानलेन दन्दह्यमानं स निरीक्ष्य विश्वम्
02020263 निर्याति सिद्धेश्वरयुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यम्
02020271 न यत्र शोको न जरा न मृत्युर् नार्तिर्न चोद्वेग ऋते कुतश्चित्
02020273 यच् चित् ततोऽदः कृपयानिदंविदां दुरन्तदुःखप्रभवानुदर्शनात्

02020281 ततो विशेषं प्रतिपद्य निर्भयस् तेनात्मनापोऽनलमूर्तिरत्वरन्
02020283 ज्योतिर्मयो वायुम् उपेत्य काले वाय्वात्मना खं बृहदात्मलिङ्गम्
02020291 घ्राणेन गन्धं रसनेन वै रसं रूपं च दृष्ट्या श्वसनं त्वचैव
02020293 श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिम् उपैति योगी
02020301 स भूतसूक्ष्मेन्द्रियसन्निकर्षं मनोमयं देवमयं विकार्यम्
02020303 संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसन्निरोधम्
02020311 तेनात्मनात्मानम् उपैति शान्तम् आनन्दम् आनन्दमयोऽवसाने
02020313 एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग
02020321 एते सृती ते नृप वेदगीते त्वयाभिपृष्टे च सनातने च
02020323 ये वै पुरा ब्रह्मण आह तुष्ट आराधितो भगवान् वासुदेवः
02020331 न ह्यतोऽन्यः शिवः पन्था विशतः संसृताविह
02020333 वासुदेवे भगवति भक्तियोगो यतो भवेत्
02020341 भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया
02020343 तदध्यवस्यत् कूटस्थो रतिरात्मन् यतो भवेत्
02020351 भगवान् सर्वभूतेषु लक्षितः स्वात्मना हरिः
02020353 दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः
02020361 तस्मात् सर्वात्मना राजन् हरिः सर्वत्र सर्वदा
02020363 श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान् नृणाम्
02020371 पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम्
02020373 पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकम्

Chapter 3

महापुरुषसंस्थानुवर्णनम् ३

0203001 श्रीशुक उवाच
02030011 एवम् एतन् निगदितं पृष्टवान् यद्भवान् मम
02030013 नृणां यन् म्रियमाणानां मनुष्येषु मनीषिणाम्
02030021 ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणः पतिम्
02030023 इन्द्रम् इन्द्रियकामस्तु प्रजाकामः प्रजापतीन्
02030031 देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम्
02030033 वसुकामो वसून् रुद्रान् वीर्यकामोऽथ वीर्यवान्
02030041 अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेः सुतान्
02030043 विश्वान् देवान् राज्यकामः साध्यान् संसाधको विशाम्
02030051 आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत्
02030053 प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ
02030061 रूपाभिकामो गन्धर्वान् स्त्रीकामोऽप्सर उर्वशीम्
02030063 आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्
02030071 यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसम्
02030073 विद्याकामस्तु गिरिशं दाम्पत्यार्थ उमां सतीम्
02030081 धर्मार्थ उत्तमश्लोकं तन्तुः तन्वन् पितॄन् यजेत्
02030083 रक्षाकामः पुण्यजनान् ओजस्कामो मरुद्गणान्
02030091 राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत्
02030093 कामकामो यजेत् सोमम् अकामः पुरुषं परम्
02030101 अकामः सर्वकामो वा मोक्षकाम उदारधीः
02030103 तीव्रेण भक्तियोगेन यजेत पुरुषं परम्
02030111 एतावान् एव यजताम् इह निःश्रेयसोदयः

02030113 भगवत्यचलो भावो यद्भागवतसङ्गतः
02030121 ज्ञानं यदाप्रतिनिवृत्तगुणोर्मिचक्रम्
02030122 आत्मप्रसाद उत यत्र गुणेष्वसङ्गः
02030123 कैवल्यसम्मतपथस्त्वथ भक्तियोगः
02030124 को निर्वृतो हरिकथासु रतिं न कुर्यात्
0203013 शौनक उवाच
02030131 इत्यभिव्याहृतं राजा निशम्य भरतर्षभः
02030133 किम् अन्यत् पृष्टवान् भूयो वैयासकिम् ऋषिं कविम्
02030141 एतच् छुश्रूषतां विद्वन् सूत नोऽर्हसि भाषितुम्
02030143 कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम्
02030151 स वै भागवतो राजा पाण्डवेयो महारथः
02030153 बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे
02030161 वैयासकिश्च भगवान् वासुदेवपरायणः
02030163 उरुगायगुणोदाराः सतां स्युर्हि समागमे
02030171 आयुर्हरति वै पुंसाम् उद्यन्न् अस्तं च यन्न् असौ
02030173 तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया
02030181 तरवः किं न जीवन्ति भस्त्राः किं न श्वसन्त्युत
02030183 न खादन्ति न मेहन्ति किं ग्रामे पशवोऽपरे
02030191 श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः
02030193 न यत्कर्णपथोपेतो जातु नाम गदाग्रजः
02030201 बिले बतोरुक्रमविक्रमान् ये न शृण्वतः कर्णपुटे नरस्य
02030203 जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः
02030211 भारः परं पट्टकिरीटजुष्टम् अप्युत्तमाङ्गं न नमेन् मुकुन्दम्
02030213 शावौ करौ नो कुरुते सपर्यां हरेर्लसत्काञ्चनकङ्कणौ वा
02030221 बर्हायिते ते नयने नराणां लिङ्गानि विष्णोर्न निरीक्षतो ये
02030223 पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ
02030231 जीवञ् छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु
02030233 श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ् छवो यस्तु न वेद गन्धम्
02030241 तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः
02030243 न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः
02030251 अथाभिधेह्यङ्ग मनो'नुकूलं प्रभाषसे भागवतप्रधानः
02030253 यदाह वैयासकिरात्मविद्या विशारदो नृपतिं साधु पृष्टः

Chapter 4

महापुरुषसंस्थानुवर्णनम् ४

0204001 सूत उवाच
02040011 वैयासकेरिति वचस्तत्त्वनिश्चयम् आत्मनः
02040013 उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्यधात्
02040021 आत्मजायासुतागार पशुद्रविणबन्धुषु
02040023 राज्ये चाविकले नित्यं विरूढां ममतां जहौ
02040031 पप्रच्छ चेमम् एवार्थं यन् मां पृच्छथ सत्तमाः
02040033 कृष्णानुभावश्रवणे श्रद्दधानो महामनाः
02040041 संस्थां विज्ञाय सन्न्यस्य कर्म त्रैवर्गिकं च यत्
02040043 वासुदेवे भगवति आत्मभावं दृढं गतः
0204005 राजोवाच
02040051 समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ
02040053 तमो विशीर्यते मह्यं हरेः कथयतः कथाम्
02040061 भूय एव विवित्सामि भगवान् आत्ममायया
02040063 यथेदं सृजते विश्वं दुर्विभाव्यम् अधीश्वरैः
02040071 यथा गोपायति विभुर्यथा संयच्छते पुनः
02040073 यां यां शक्तिम् उपाश्रित्य पुरुशक्तिः परः पुमान्
02040075 आत्मानं क्रीडयन् क्रीडन् करोति विकरोति च
02040081 नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः
02040083 दुर्विभाव्यम् इवाभाति कविभिश्चापि चेष्टितम्
02040091 यथा गुणांस्तु प्रकृतेर्युगपत् क्रमशोऽपि वा
02040093 बिभर्ति भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः
02040101 विचिकित्सितम् एतन् मे ब्रवीतु भगवान् यथा

02040103 शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान् खलु
0204011 सूत उवाच
02040111 इत्युपामन्त्रितो राज्ञा गुणानुकथने हरेः
02040113 हृषीकेशम् अनुस्मृत्य प्रतिवक्तुं प्रचक्रमे
0204012 श्रीशुक उवाच
02040121 नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया
02040123 गृहीतशक्तित्रितयाय देहिनाम् अन्तर्भवायानुपलक्ष्यवर्त्मने
02040131 भूयो नमः सद्वृजिनच्छिदेऽसताम् असम्भवायाखिलसत्त्वमूर्तये
02040133 पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानाम् अनुमृग्यदाशुषे
02040141 नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम्
02040143 निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः
02040151 यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वन्दनं यच्छ्रवणं यदर्हणम्
02040153 लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः
02040161 विचक्षणा यच्चरणोपसादनात् सङ्गं व्युदस्योभयतोऽन्तरात्मनः
02040163 विन्दन्ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः
02040171 तपस्विनो दानपरा यशस्विनो मनस्विनो मन्त्रविदः सुमङ्गलाः
02040173 क्षेमं न विन्दन्ति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः
02040181 किरातहूणान्ध्रपुलिन्दपुल्कशा आभीरशुम्भा यवनाः खसादयः
02040183 येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः
02040191 स एष आत्मात्मवताम् अधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः
02040193 गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान् प्रसीदताम्
02040201 श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः
02040203 पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः
02040211 यदङ्घ्र्यभिध्यानसमाधिधौतया धियानुपश्यन्ति हि तत्त्वम् आत्मनः
02040213 वदन्ति चैतत् कवयो यथारुचं स मे मुकुन्दो भगवान् प्रसीदताम्
02040221 प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि
02040223 स्वलक्षणा प्रादुरभूत् किलास्यतः स मे ऋषीणाम् ऋषभः प्रसीदताम्
02040231 भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः
02040233 भुङ्क्ते गुणान् षोडश षोडशात्मकः सोऽलङ्कृषीष्ट भगवान् वचांसि मे
02040241 नमस्तस्मै भगवते वासुदेवाय वेधसे
02040243 पपुर्ज्ञानम् अयं सौम्या यन्मुखाम्बुरुहासवम्
02040251 एतदेवात्मभू राजन् नारदाय विपृच्छते
02040253 वेदगर्भोऽभ्यधात् साक्षाद्यदाह हरिरात्मनः

Chapter 5

महापुरुषसंस्थानुवर्णनम् ५

0205001 नारद उवाच
02050011 देवदेव नमस्तेऽस्तु भूतभावन पूर्वज
02050013 तद्विजानीहि यज् ज्ञानम् आत्मतत्त्वनिदर्शनम्
02050021 यद्रूपं यदधिष्ठानं यतः सृष्टम् इदं प्रभो
02050023 यत् संस्थं यत् परं यच् च तत् तत्त्वं वद तत्त्वतः
02050031 सर्वं ह्येतद्भवान् वेद भूतभव्यभवत्प्रभुः
02050033 करामलकवद्विश्वं विज्ञानावसितं तव
02050041 यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः
02050043 एकः सृजसि भूतानि भूतैरेवात्ममायया
02050051 आत्मन् भावयसे तानि न पराभावयन् स्वयम्
02050053 आत्मशक्तिम् अवष्टभ्य ऊर्णनाभिरिवाक्लमः
02050061 नाहं वेद परं ह्यस्मिन् नापरं न समं विभो
02050063 नामरूपगुणैर्भाव्यं सदसत् किञ्चिदन्यतः
02050071 स भवान् अचरद्घोरं यत् तपः सुसमाहितः
02050073 तेन खेदयसे नस्त्वं पराशङ्कां च यच्छसि
02050081 एतन् मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर
02050083 विजानीहि यथैवेदम् अहं बुध्येऽनुशासितः
0205009 ब्रह्मोवाच
02050091 सम्यक् कारुणिकस्येदं वत्स ते विचिकित्सितम्
02050093 यदहं चोदितः सौम्य भगवद्वीर्यदर्शने
02050101 नानृतं तव तच् चापि यथा मां प्रब्रवीषि भोः
02050103 अविज्ञाय परं मत्त एतावत् त्वं यतो हि मे

02050111 येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्
02050113 यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः
02050121 तस्मै नमो भगवते वासुदेवाय धीमहि
02050123 यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम्
02050131 विलज्जमानया यस्य स्थातुम् ईक्षापथेऽमुया
02050133 विमोहिता विकत्थन्ते ममाहम् इति दुर्धियः
02050141 द्रव्यं कर्म च कालश्च स्वभावो जीव एव च
02050143 वासुदेवात् परो ब्रह्मन् न चान्योऽर्थोऽस्ति तत्त्वतः
02050151 नारायणपरा वेदा देवा नारायणाङ्गजाः
02050153 नारायणपरा लोका नारायणपरा मखाः
02050161 नारायणपरो योगो नारायणपरं तपः
02050163 नारायणपरं ज्ञानं नारायणपरा गतिः
02050171 तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः
02050173 सृज्यं सृजामि सृष्टोऽहम् ईक्षयैवाभिचोदितः
02050181 सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः
02050183 स्थितिसर्गनिरोधेषु गृहीता मायया विभोः
02050191 कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः
02050193 बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः
02050201 स एष भगवाँल्लिङ्गैस्त्रिभिरेतैरधोक्षजः
02050203 स्वलक्षितगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः
02050211 कालं कर्म स्वभावं च मायेशो मायया स्वया
02050213 आत्मन् यदृच्छया प्राप्तं विबुभूषुरुपाददे
02050221 कालाद्गुणव्यतिकरः परिणामः स्वभावतः
02050223 कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्
02050231 महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात्
02050233 तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः
02050241 सोऽहङ्कार इति प्रोक्तो विकुर्वन् समभूत् त्रिधा
02050243 वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा
02050245 द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो
02050251 तामसादपि भूतादेर्विकुर्वाणादभून् नभः
02050253 तस्य मात्रा गुणः शब्दो लिङ्गं यद्द्रष्टृदृश्ययोः
02050261 नभसोऽथ विकुर्वाणादभूत् स्पर्शगुणोऽनिलः
02050263 परान्वयाच् छब्दवांश्च प्राण ओजः सहो बलम्
02050271 वायोरपि विकुर्वाणात् कालकर्मस्वभावतः
02050273 उदपद्यत तेजो वै रूपवत् स्पर्शशब्दवत्
02050281 तेजसस्तु विकुर्वाणादासीदम्भो रसात्मकम्

02050283 रूपवत् स्पर्शवच् चाम्भो घोषवच् च परान्वयात्
02050291 विशेषस्तु विकुर्वाणादम्भसो गन्धवान् अभूत्
02050293 परान्वयाद्रसस्पर्श शब्दरूपगुणान्वितः
02050301 वैकारिकान् मनो जज्ञे देवा वैकारिका दश
02050303 दिग्वातार्कप्रचेतोऽश्वि वह्नीन्द्रोपेन्द्रमित्रकाः
02050311 तैजसात् तु विकुर्वाणादिन्द्रियाणि दशाभवन्
02050313 ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणश्च तैजसौ
02050315 श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्राङ्घ्रिपायवः
02050321 यदैतेऽसङ्गता भावा भूतेन्द्रियमनोगुणाः
02050323 यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम
02050331 तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः
02050333 सदसत्त्वम् उपादाय चोभयं ससृजुर्ह्यदः
02050341 वर्षपूगसहस्रान्ते तदण्डम् उदके शयम्
02050343 कालकर्मस्वभावस्थो जीवो ऽजीवम् अजीवयत्
02050351 स एव पुरुषस्तस्मादण्डं निर्भिद्य निर्गतः
02050353 सहस्रोर्वङ्घ्रिबाह्वक्षः सहस्राननशीर्षवान्
02050361 यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः
02050363 कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः
02050371 पुरुषस्य मुखं ब्रह्म क्षत्रम् एतस्य बाहवः
02050373 ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रो व्यजायत
02050381 भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः
02050383 हृदा स्वर्लोक उरसा महर्लोको महात्मनः
02050391 ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात्
02050393 मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः
02050401 तत्कट्यां चातलं क्लृप्तम् ऊरुभ्यां वितलं विभोः
02050403 जानुभ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलम्
02050411 महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम्
02050413 पातालं पादतलत इति लोकमयः पुमान्
02050421 भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः
02050423 स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना

Chapter 6

ब्रह्मनारदसंवादे पुरुषविभूतिवर्णनम्

0206001 ब्रह्मोवाच
02060011 वाचां वह्नेर्मुखं क्षेत्रं छन्दसां सप्त धातवः
02060013 हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च
02060021 सर्वासूनां च वायोश्च तन्नासे परमायणे
02060023 अश्विनोरोषधीनां च घ्राणो मोदप्रमोदयोः
02060031 रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी
02060033 कर्णौ दिशां च तीर्थानां श्रोत्रम् आकाशशब्दयोः
02060035 तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम्
02060041 त्वग् अस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि
02060043 रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु सम्भृतः
02060051 केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम्
02060053 बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम्
02060061 विक्रमो भूर्भुवः स्वश्च क्षेमस्य शरणस्य च
02060063 सर्वकामवरस्यापि हरेश्चरण आस्पदम्
02060071 अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः
02060073 पुंसः शिश्न उपस्थस्तु प्रजात्यानन्दनिर्वृतेः
02060081 पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद
02060083 हिंसाया निरृतेर्मृत्योर्निरयस्य गुदं स्मृतः
02060091 पराभूतेरधर्मस्य तमसश्चापि पश्चिमः
02060093 नाड्यो नदनदीनां च गोत्राणाम् अस्थिसंहतिः
02060101 अव्यक्तरससिन्धूनां भूतानां निधनस्य च
02060103 उदरं विदितं पुंसो हृदयं मनसः पदम्
02060111 धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च

02060113 विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम्
02060121 अहं भवान् भवश्चैव त इमे मुनयोऽग्रजाः
02060123 सुरासुरनरा नागाः खगा मृगसरीसृपाः
02060131 गन्धर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः
02060133 पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः
02060141 अन्ये च विविधा जीवाजलस्थलनभौकसः
02060143 ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः
02060151 सर्वं पुरुष एवेदं भूतं भव्यं भवच् च यत्
02060153 तेनेदम् आवृतं विश्वं वितस्तिम् अधितिष्ठति
02060161 स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ
02060163 एवं विराजं प्रतपंस्तपत्यन्तर्बहिः पुमान्
02060171 सोऽमृतस्याभयस्येशो मर्त्यम् अन्नं यदत्यगात्
02060173 महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः
02060181 पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः
02060183 अमृतं क्षेमम् अभयं त्रिमूर्ध्नोऽधायि मूर्धसु
02060191 पादास्त्रयो बहिश्चासन्न् अप्रजानां य आश्रमाः
02060193 अन्तस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः
02060201 सृती विचक्रमे विश्वम् साशनानशने उभे
02060203 यदविद्या च विद्या च पुरुषस्तूभयाश्रयः
02060211 यस्मादण्डं विराड्जज्ञे भूतेन्द्रियगुणात्मकः
02060213 तद्द्रव्यम् अत्यगाद्विश्वं गोभिः सूर्य इवातपन्
02060221 यदास्य नाभ्यान् नलिनादहम् आसं महात्मनः
02060223 नाविदं यज्ञसम्भारान् पुरुषावयवान् ऋते
02060231 तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः
02060233 इदं च देवयजनं कालश्चोरुगुणान्वितः
02060241 वस्तून्योषधयः स्नेहा रसलोहमृदो जलम्
02060243 ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम
02060251 नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च
02060253 देवतानुक्रमः कल्पः सङ्कल्पस्तन्त्रम् एव च
02060261 गतयो मतयश्चैव प्रायश्चित्तं समर्पणम्
02060263 पुरुषावयवैरेते सम्भाराः सम्भृता मया
02060271 इति सम्भृतसम्भारः पुरुषावयवैरहम्
02060273 तम् एव पुरुषं यज्ञं तेनैवायजम् ईश्वरम्
02060281 ततस्ते भ्रातर इमे प्रजानां पतयो नव
02060283 अयजन् व्यक्तम् अव्यक्तं पुरुषं सुसमाहिताः
02060291 ततश्च मनवः काले ईजिरे ऋषयोऽपरे

02060293 पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम्
02060301 नारायणे भगवति तदिदं विश्वम् आहितम्
02060303 गृहीतमायोरुगुणः सर्गादावगुणः स्वतः
02060311 सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः
02060313 विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक्
02060321 इति तेऽभिहितं तात यथेदम् अनुपृच्छसि
02060323 नान्यद्भगवतः किञ्चिद्भाव्यं सदसदात्मकम्
02060331 न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन् मे मनसो मृषा गतिः
02060333 न मे हृषीकाणि पतन्त्यसत्पथे यन् मे हृदौत्कण्ठ्यवता धृतो हरिः
02060341 सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनाम् अभिवन्दितः पतिः
02060343 आस्थाय योगं निपुणं समाहितस्तं नाध्यगच्छं यत आत्मसम्भवः
02060351 नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमङ्गलम्
02060353 यो ह्यात्ममायाविभवं स्म पर्यगाद् यथा नभः स्वान्तम् अथापरे कुतः
02060361 नाहं न यूयं यदृतां गतिं विदुर् न वामदेवः किम् उतापरे सुराः
02060363 तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे
02060371 यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः
02060373 न यं विदन्ति तत्त्वेन तस्मै भगवते नमः
02060381 स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः
02060383 आत्मात्मन्यात्मनात्मानं स संयच्छति पाति च
02060391 विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यग् अवस्थितम्
02060393 सत्यं पूर्णम् अनाद्यन्तं निर्गुणं नित्यम् अद्वयम्
02060401 ऋषे विदन्ति मुनयः प्रशान्तात्मेन्द्रियाशयाः
02060403 यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतम्
02060411 आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च
02060413 द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः
02060421 अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च
02060423 स्वर्लोकपालाः खगलोकपाला नृलोकपालास्तललोकपालाः
02060431 गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः
02060433 ये वा ऋषीणाम् ऋषभाः पितॄणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्राः
02060435 अन्ये च ये प्रेतपिशाचभूत कूष्माण्डयादोमृगपक्ष्यधीशाः
02060441 यत् किञ्च लोके भगवन् महस्वद् ओजःसहस्वद्बलवत् क्षमावत्
02060443 श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम्
02060451 प्राधान्यतो यान् ऋष आमनन्ति लीलावतारान् पुरुषस्य भूम्नः
02060453 आपीयतां कर्णकषायशोषान् अनुक्रमिष्ये त इमान् सुपेशान्

Chapter 7

ब्रह्मनारदसंवादः

0207001 ब्रह्मोवाच
02070011 यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत्
02070012 क्रौडीं तनुं सकलयज्ञमयीम् अनन्तः
02070013 अन्तर्महार्णव उपागतम् आदिदैत्यं
02070014 तं दंष्ट्रयाद्रिम् इव वज्रधरो ददार
02070021 जातो रुचेरजनयत् सुयमान् सुयज्ञ
02070022 आकूतिसूनुरमरान् अथ दक्षिणायाम्
02070023 लोकत्रयस्य महतीम् अहरद्यदार्तिं
02070024 स्वायम्भुवेन मनुना हरिरित्यनूक्तः
02070031 जज्ञे च कर्दमगृहे द्विज देवहूत्यां
02070032 स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे
02070033 ऊचे ययात्मशमलं गुणसङ्गपङ्कम्
02070034 अस्मिन् विधूय कपिलस्य गतिं प्रपेदे
02070041 अत्रेरपत्यम् अभिकाङ्क्षत आह तुष्टो
02070042 दत्तो मयाहम् इति यद्भगवान् स दत्तः
02070043 यत्पादपङ्कजपरागपवित्रदेहा
02070044 योगर्द्धिम् आपुरुभयीं यदुहैहयाद्याः
02070051 तप्तं तपो विविधलोकसिसृक्षया मे
02070052 आदौ सनात् स्वतपसः स चतुःसनोऽभूत्
02070053 प्राक्कल्पसम्प्लवविनष्टम् इहात्मतत्त्वं
02070054 सम्यग् जगाद मुनयो यदचक्षतात्मन्
02070061 धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां

02070062 नारायणो नर इति स्वतपःप्रभावः
02070063 दृष्ट्वात्मनो भगवतो नियमावलोपं
02070064 देव्यस्त्वनङ्गपृतना घटितुं न शेकुः
02070071 कामं दहन्ति कृतिनो ननु रोषदृष्ट्या
02070072 रोषं दहन्तम् उत ते न दहन्त्यसह्यम्
02070073 सोऽयं यदन्तरम् अलं प्रविशन् बिभेति
02070074 कामः कथं नु पुनरस्य मनः श्रयेत
02070081 विद्धः सपत्न्युदितपत्रिभिरन्ति राज्ञो
02070082 बालोऽपि सन्न् उपगतस्तपसे वनानि
02070083 तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो
02070084 दिव्याः स्तुवन्ति मुनयो यदुपर्यधस्तात्
02070091 यद्वेनम् उत्पथगतं द्विजवाक्यवज्र
02070092 निष्प्लुष्टपौरुषभगं निरये पतन्तम्
02070093 त्रात्वार्थितो जगति पुत्रपदं च लेभे
02070094 दुग्धा वसूनि वसुधा सकलानि येन
02070101 नाभेरसावृषभ आस सुदेविसूनुर्
02070102 यो वै चचार समदृग् जडयोगचर्याम्
02070103 यत् पारमहंस्यम् ऋषयः पदम् आमनन्ति
02070104 स्वस्थः प्रशान्तकरणः परिमुक्तसङ्गः
02070111 सत्रे ममास भगवान् हयशीरषाथो
02070112 साक्षात् स यज्ञपुरुषस्तपनीयवर्णः
02070113 छन्दोमयो मखमयोऽखिलदेवतात्मा
02070114 वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः
02070121 मत्स्यो युगान्तसमये मनुनोपलब्धः
02070122 क्षोणीमयो निखिलजीवनिकायकेतः
02070123 विस्रंसितान् उरुभये सलिले मुखान् मे
02070124 आदाय तत्र विजहार ह वेदमार्गान्
02070131 क्षीरोदधावमरदानवयूथपानाम्
02070132 उन्मथ्नताम् अमृतलब्धय आदिदेवः
02070133 पृष्ठेन कच्छपवपुर्विदधार गोत्रं
02070134 निद्राक्षणोऽद्रिपरिवर्तकषाणकण्डूः
02070141 त्रैपिष्टपोरुभयहा स नृसिंहरूपं
02070142 कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम्
02070143 दैत्येन्द्रम् आशु गदयाभिपतन्तम् आराद्
02070144 ऊरौ निपात्य विददार नखैः स्फुरन्तम्
02070151 अन्तःसरस्युरुबलेन पदे गृहीतो

02070152 ग्राहेण यूथपतिरम्बुजहस्त आर्तः
02070153 आहेदम् आदिपुरुषाखिललोकनाथ
02070154 तीर्थश्रवः श्रवणमङ्गलनामधेय
02070161 श्रुत्वा हरिस्तम् अरणार्थिनम् अप्रमेयश्
02070162 चक्रायुधः पतगराजभुजाधिरूढः
02070163 चक्रेण नक्रवदनं विनिपाट्य तस्माद्
02070164 धस्ते प्रगृह्य भगवान् कृपयोज्जहार
02070171 ज्यायान् गुणैरवरजोऽप्यदितेः सुतानां
02070172 लोकान् विचक्रम इमान् यदथाधियज्ञः
02070173 क्ष्मां वामनेन जगृहे त्रिपदच्छलेन
02070174 याञ्चाम् ऋते पथि चरन् प्रभुभिर्न चाल्यः
02070181 नार्थो बलेरयम् उरुक्रमपादशौचम्
02070182 आपः शिखाधृतवतो विबुधाधिपत्यम्
02070183 यो वै प्रतिश्रुतम् ऋते न चिकीर्षदन्यद्
02070184 आत्मानम् अङ्ग मनसा हरयेऽभिमेने
02070191 तुभ्यं च नारद भृशं भगवान् विवृद्ध
02070192 भावेन साधु परितुष्ट उवाच योगम्
02070193 ज्ञानं च भागवतम् आत्मसतत्त्वदीपं
02070194 यद्वासुदेवशरणा विदुरञ्जसैव
02070201 चक्रं च दिक्ष्वविहतं दशसु स्वतेजो
02070202 मन्वन्तरेषु मनुवंशधरो बिभर्ति
02070203 दुष्टेषु राजसु दमं व्यदधात् स्वकीर्तिं
02070204 सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः
02070211 धन्वन्तरिश्च भगवान् स्वयम् एव कीर्तिर्
02070212 नाम्ना नृणां पुरुरुजां रुज आशु हन्ति
02070213 यज्ञे च भागम् अमृतायुरवावरुन्ध
02070214 आयुष्यवेदम् अनुशास्त्यवतीर्य लोके
02070221 क्षत्रं क्षयाय विधिनोपभृतं महात्मा
02070222 ब्रह्मध्रुग् उज्झितपथं नरकार्तिलिप्सु
02070223 उद्धन्त्यसाववनिकण्टकम् उग्रवीर्यस्
02070224 त्रिःसप्तकृत्व उरुधारपरश्वधेन
02070231 अस्मत्प्रसादसुमुखः कलया कलेश
02070232 इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे
02070233 तिष्ठन् वनं सदयितानुज आविवेश
02070234 यस्मिन् विरुध्य दशकन्धर आर्तिम् आर्च्छत्
02070241 यस्मा अदादुदधिरूढभयाङ्गवेपो

02070242 मार्गं सपद्यरिपुरं हरवद्दिधक्षोः
02070243 दूरे सुहृन्मथितरोषसुशोणदृष्ट्या
02070244 तातप्यमानमकरोरगनक्रचक्रः
02070251 वक्षःस्थलस्पर्शरुग्नमहेन्द्रवाह
02070252 दन्तैर्विडम्बितककुब्जुष ऊढहासम्
02070253 सद्योऽसुभिः सह विनेष्यति दारहर्तुर्
02070254 विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये
02070261 भूमेः सुरेतरवरूथविमर्दितायाः
02070262 क्लेशव्ययाय कलया सितकृष्णकेशः
02070263 जातः करिष्यति जनानुपलक्ष्यमार्गः
02070264 कर्माणि चात्ममहिमोपनिबन्धनानि
02070271 तोकेन जीवहरणं यदुलूकिकायास्
02070272 त्रैमासिकस्य च पदा शकटोऽपवृत्तः
02070273 यद्रिङ्गतान्तरगतेन दिविस्पृशोर्वा
02070274 उन्मूलनं त्वितरथार्जुनयोर्न भाव्यम्
02070281 यद्वै व्रजे व्रजपशून् विषतोयपीतान्
02070282 पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या
02070283 तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वम्
02070284 उच्चाटयिष्यदुरगं विहरन् ह्रदिन्याम्
02070291 तत् कर्म दिव्यम् इव यन् निशि निःशयानं
02070292 दावाग्निना शुचिवने परिदह्यमाने
02070293 उन्नेष्यति व्रजम् अतोऽवसितान्तकालं
02070294 नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः
02070301 गृह्णीत यद्यदुपबन्धम् अमुष्य माता
02070302 शुल्बं सुतस्य न तु तत् तदमुष्य माति
02070303 यज् जृम्भतोऽस्य वदने भुवनानि गोपी
02070304 संवीक्ष्य शङ्कितमनाः प्रतिबोधितासीत्
02070311 नन्दं च मोक्ष्यति भयाद्वरुणस्य पाशाद्
02070312 गोपान् बिलेषु पिहितान् मयसूनुना च
02070313 अह्न्यापृतं निशि शयानम् अतिश्रमेण
02070314 लोकं विकुण्ठम् उपनेष्यति गोकुलं स्म
02070321 गोपैर्मखे प्रतिहते व्रजविप्लवाय
02070322 देवेऽभिवर्षति पशून् कृपया रिरक्षुः
02070323 धर्तोच्छिलीन्ध्रम् इव सप्तदिनानि सप्त
02070324 वर्षो महीध्रम् अनघैककरे सलीलम्
02070331 क्रीडन् वने निशि निशाकररश्मिगौर्यां

02070332 रासोन्मुखः कलपदायतमूर्च्छितेन
02070333 उद्दीपितस्मररुजां व्रजभृद्वधूनां
02070334 हर्तुर्हरिष्यति शिरो धनदानुगस्य
02070341 ये च प्रलम्बखरदर्दुरकेश्यरिष्ट
02070342 मल्लेभकंसयवनाः कपिपौण्ड्रकाद्याः
02070343 अन्ये च शाल्वकुजबल्वलदन्तवक्र
02070344 सप्तोक्षशम्बरविदूरथरुक्मिमुख्याः
02070351 ये वा मृधे समितिशालिन आत्तचापाः
02070352 काम्बोजमत्स्यकुरुसृञ्जयकैकयाद्याः
02070353 यास्यन्त्यदर्शनम् अलं बलपार्थभीम
02070354 व्याजाह्वयेन हरिणा निलयं तदीयम्
02070361 कालेन मीलितधियाम् अवमृश्य न्णां
02070362 स्तोकायुषां स्वनिगमो बत दूरपारः
02070363 आविर्हितस्त्वनुयुगं स हि सत्यवत्यां
02070364 वेदद्रुमं विटपशो विभजिष्यति स्म
02070371 देवद्विषां निगमवर्त्मनि निष्ठितानां
02070372 पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः
02070373 लोकान् घ्नतां मतिविमोहम् अतिप्रलोभं
02070374 वेषं विधाय बहु भाष्यत औपधर्म्यम्
02070381 यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः
02070382 पाषण्डिनो द्विजजना वृषला नृदेवाः
02070383 स्वाहा स्वधा वषडिति स्म गिरो न यत्र
02070384 शास्ता भविष्यति कलेर्भगवान् युगान्ते
02070391 सर्गे तपोऽहम् ऋषयो नव ये प्रजेशाः
02070392 स्थानेऽथ धर्ममखमन्वमरावनीशाः
02070393 अन्ते त्वधर्महरमन्युवशासुराद्या
02070394 मायाविभूतय इमाः पुरुशक्तिभाजः
02070401 विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह
02070402 यः पार्थिवान्यपि कविर्विममे रजांसि
02070403 चस्कम्भ यः स्वरहसास्खलता त्रिपृष्ठं
02070404 यस्मात् त्रिसाम्यसदनादुरुकम्पयानम्
02070411 नान्तं विदाम्यहम् अमी मुनयोऽग्रजास्ते
02070412 मायाबलस्य पुरुषस्य कुतोऽवरा ये
02070413 गायन् गुणान् दशशतानन आदिदेवः
02070414 शेषोऽधुनापि समवस्यति नास्य पारम्
02070421 येषां स एष भगवान् दययेदनन्तः
02070422 सर्वात्मनाश्रितपदो यदि निर्व्यलीकम्

02070423 ते दुस्तराम् अतितरन्ति च देवमायां
02070424 नैषां ममाहम् इति धीः श्वशृगालभक्ष्ये
02070431 वेदाहम् अङ्ग परमस्य हि योगमायां
02070432 यूयं भवश्च भगवान् अथ दैत्यवर्यः
02070433 पत्नी मनोः स च मनुश्च तदात्मजाश्च
02070434 प्राचीनबर्हिर्ऋभुरङ्ग उत ध्रुवश्च
02070441 इक्ष्वाकुरैलमुचुकुन्दविदेहगाधि
02070442 रघ्वम्बरीषसगरा गयनाहुषाद्याः
02070443 मान्धात्रलर्कशतधन्वनुरन्तिदेवा
02070444 देवव्रतो बलिरमूर्त्तरयो दिलीपः
02070451 सौभर्युतङ्कशिबिदेवलपिप्पलाद
02070452 सारस्वतोद्धवपराशरभूरिषेणाः
02070453 येऽन्ये विभीषणहनूमदुपेन्द्रदत्त
02070454 पार्थार्ष्टिषेणविदुरश्रुतदेववर्याः
02070461 ते वै विदन्त्यतितरन्ति च देवमायां
02070462 स्त्रीशूद्रहूणशबरा अपि पापजीवाः
02070463 यद्यद्भुतक्रमपरायणशीलशिक्षास्
02070464 तिर्यग्जना अपि किम् उ श्रुतधारणा ये
02070471 शश्वत् प्रशान्तम् अभयं प्रतिबोधमात्रं
02070472 शुद्धं समं सदसतः परमात्मतत्त्वम्
02070473 शब्दो न यत्र पुरुकारकवान् क्रियार्थो
02070474 माया परैत्यभिमुखे च विलज्जमाना
02070481 तद्वै पदं भगवतः परमस्य पुंसो
02070482 ब्रह्मेति यद्विदुरजस्रसुखं विशोकम्
02070483 सध्र्यङ् नियम्य यतयो यमकर्तहेतिं
02070484 जह्युः स्वराडिव निपानखनित्रम् इन्द्रः
02070491 स श्रेयसाम् अपि विभुर्भगवान् यतोऽस्य
02070492 भावस्वभावविहितस्य सतः प्रसिद्धिः
02070493 देहे स्वधातुविगमेऽनुविशीर्यमाणे
02070494 व्योमेव तत्र पुरुषो न विशीर्यते ज्ञः
02070501 सोऽयं तेऽभिहितस्तात भगवान् विश्वभावनः
02070503 समासेन हरेर्नान्यदन्यस्मात् सदसच् च यत्
02070511 इदं भागवतं नाम यन् मे भगवतोदितम्
02070513 सङ्ग्रहोऽयं विभूतीनां त्वम् एतद्विपुली कुरु
02070521 यथा हरौ भगवति नृणां भक्तिर्भविष्यति
02070523 सर्वात्मन्यखिलाधारे इति सङ्कल्प्य वर्णय

02070531 मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः
02070533 शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति

Chapter 8

परीक्षित्प्रश्नः

0208001 राजोवाच
02080011 ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च
02080013 यस्मै यस्मै यथा प्राह नारदो देवदर्शनः
02080021 एतद्वेदितुम् इच्छामि तत्त्वं तत्त्वविदां वर
02080023 हरेरद्भुतवीर्यस्य कथा लोकसुमङ्गलाः
02080031 कथयस्व महाभाग यथाहम् अखिलात्मनि
02080033 कृष्णे निवेश्य निःसङ्गं मनस्त्यक्ष्ये कलेवरम्
02080041 शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम्
02080043 कालेन नातिदीर्घेण भगवान् विशते हृदि
02080051 प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्
02080053 धुनोति शमलं कृष्णः सलिलस्य यथा शरत्
02080061 धौतात्मा पुरुषः कृष्ण पादमूलं न मुञ्चति
02080063 मुक्तसर्वपरिक्लेशः पान्थः स्वशरणं यथा
02080071 यदधातुमतो ब्रह्मन् देहारम्भोऽस्य धातुभिः
02080073 यदृच्छया हेतुना वा भवन्तो जानते यथा
02080081 आसीद्यदुदरात् पद्मं लोकसंस्थानलक्षणम्
02080083 यावान् अयं वै पुरुष इयत्तावयवैः पृथक्
02080085 तावान् असाविति प्रोक्तः संस्थावयववान् इव
02080091 अजः सृजति भूतानि भूतात्मा यदनुग्रहात्
02080093 ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः
02080101 स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः
02080103 मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः
02080111 पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः

02080113 लोकैरमुष्यावयवाः सपालैरिति शुश्रुम
02080121 यावान् कल्पो विकल्पो वा यथा कालोऽनुमीयते
02080123 भूतभव्यभवच्छब्द आयुर्मानं च यत् सतः
02080131 कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि
02080133 यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम
02080141 यस्मिन् कर्मसमावायो यथा येनोपगृह्यते
02080143 गुणानां गुणिनां चैव परिणामम् अभीप्सताम्
02080151 भूपातालककुब्व्योम ग्रहनक्षत्रभूभृताम्
02080153 सरित्समुद्रद्वीपानां सम्भवश्चैतदोकसाम्
02080161 प्रमाणम् अण्डकोशस्य बाह्याभ्यन्तरभेदतः
02080163 महतां चानुचरितं वर्णाश्रमविनिश्चयः
02080171 युगानि युगमानं च धर्मो यश्च युगे युगे
02080173 अवतारानुचरितं यदाश्चर्यतमं हरेः
02080181 नृणां साधारणो धर्मः सविशेषश्च यादृशः
02080183 श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम्
02080191 तत्त्वानां परिसङ्ख्यानं लक्षणं हेतुलक्षणम्
02080193 पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च
02080201 योगेश्वरैश्वर्यगतिर्लिङ्गभङ्गस्तु योगिनाम्
02080203 वेदोपवेदधर्माणाम् इतिहासपुराणयोः
02080211 सम्प्लवः सर्वभूतानां विक्रमः प्रतिसङ्क्रमः
02080213 इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः
02080221 यो वानुशायिनां सर्गः पाषण्डस्य च सम्भवः
02080223 आत्मनो बन्धमोक्षौ च व्यवस्थानं स्वरूपतः
02080231 यथात्मतन्त्रो भगवान् विक्रीडत्यात्ममायया
02080233 विसृज्य वा यथा मायाम् उदास्ते साक्षिवद्विभुः
02080241 सर्वम् एतच् च भगवन् पृच्छतो मेऽनुपूर्वशः
02080243 तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने
02080251 अत्र प्रमाणं हि भवान् परमेष्ठी यथात्मभूः
02080253 अपरे चानुतिष्ठन्ति पूर्वेषां पूर्वजैः कृतम्
02080261 न मेऽसवः परायन्ति ब्रह्मन्न् अनशनादमी
02080263 पिबतो ऽच्युतपीयूषम् तद्वाक्याब्धिविनिःसृतम्
0208027 सूत उवाच
02080271 स उपामन्त्रितो राज्ञा कथायाम् इति सत्पतेः
02080273 ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि
02080281 प्राह भागवतं नाम पुराणं ब्रह्मसम्मितम्
02080283 ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते

02080291 यद्यत् परीक्षिदृषभः पाण्डूनाम् अनुपृच्छति
02080293 आनुपूर्व्येण तत् सर्वम् आख्यातुम् उपचक्रमे

Chapter 9

भागवतप्रवृत्तिः

0209001 श्रीशुक उवाच
02090011 आत्ममायाम् ऋते राजन् परस्यानुभवात्मनः
02090013 न घटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा
02090021 बहुरूप इवाभाति मायया बहुरूपया
02090023 रममाणो गुणेष्वस्या ममाहम् इति मन्यते
02090031 यर्हि वाव महिम्नि स्वे परस्मिन् कालमाययोः
02090033 रमेत गतसम्मोहस्त्यक्त्वोदास्ते तदोभयम्
02090041 आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवान् ऋतम्
02090043 ब्रह्मणे दर्शयन् रूपम् अव्यलीकव्रतादृतः
02090051 स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यम् आस्थाय सिसृक्षयैक्षत
02090053 तां नाध्यगच्छद्दृशम् अत्र सम्मतां प्रपञ्चनिर्माणविधिर्यया भवेत्
02090061 स चिन्तयन् द्व्यक्षरम् एकदाम्भस्य् उपाशृणोद्द्विर्गदितं वचो विभुः
02090063 स्पर्शेषु यत् षोडशम् एकविंशं निष्किञ्चनानां नृप यद्धनं विदुः
02090071 निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः
02090073 स्वधिष्ण्यम् आस्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः
02090081 दिव्यं सहस्राब्दम् अमोघदर्शनो जितानिलात्मा विजितोभयेन्द्रियः
02090083 अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः
02090091 तस्मै स्वलोकं भगवान् सभाजितः सन्दर्शयाम् आस परं न यत्परम्
02090093 व्यपेतसङ्क्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्पुरुषैरभिष्टुतम्
02090101 प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः
02090103 न यत्र माया किम् उतापरे हरेर् अनुव्रता यत्र सुरासुरार्चिताः
02090111 श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः

02090113 सर्वे चतुर्बाहव उन्मिषन्मणि प्रवेकनिष्काभरणाः सुवर्चसः
02090115 प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुण्डलमौलिमालिनः
02090121 भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम्
02090123 विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः
02090131 श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः
02090133 प्रेङ्खं श्रिता या कुसुमाकरानुगैर् विगीयमाना प्रियकर्म गायती
02090141 ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम्
02090143 सुनन्दनन्दप्रबलार्हणादिभिः स्वपार्षदाग्रैः परिसेवितं विभुम्
02090151 भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम्
02090153 किरीटिनं कुण्डलिनं चतुर्भुजं पीतांशुकं वक्षसि लक्षितं श्रिया
02090161 अध्यर्हणीयासनम् आस्थितं परं वृतं चतुःषोडशपञ्चशक्तिभिः
02090163 युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन् रममाणम् ईश्वरम्
02090171 तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः
02090173 ननाम पादाम्बुजम् अस्य विश्वसृग् यत् पारमहंस्येन पथाधिगम्यते
02090181 तं प्रीयमाणं समुपस्थितं कविं प्रजाविसर्गे निजशासनार्हणम्
02090183 बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन्
0209019 श्रीभगवान् उवाच
02090191 त्वयाहं तोषितः सम्यग् वेदगर्भ सिसृक्षया
02090193 चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम्
02090201 वरं वरय भद्रं ते वरेशं माभिवाञ्छितम्
02090203 ब्रह्म' छ्रेयःपरिश्रामः पुंसां मद्दर्शनावधिः
02090211 मनीषितानुभावोऽयं मम लोकावलोकनम्
02090213 यदुपश्रुत्य रहसि चकर्थ परमं तपः
02090221 प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते
02090223 तपो मे हृदयं साक्षादात्माहं तपसोऽनघ
02090231 सृजामि तपसैवेदं ग्रसामि तपसा पुनः
02090233 बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः
0209024 ब्रह्मोवाच
02090241 भगवन् सर्वभूतानाम् अध्यक्षोऽवस्थितो गुहाम्
02090243 वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम्
02090251 तथापि नाथमानस्य नाथ नाथय नाथितम्
02090253 परावरे यथा रूपेजानीयां ते त्वरूपिणः
02090261 यथात्ममायायोगेन नानाशक्त्युपबृंहितम्
02090263 विलुम्पन् विसृजन् गृह्णन् बिभ्रदात्मानम् आत्मना
02090271 क्रीडस्यमोघसङ्कल्प ऊर्णनाभिर्यथोर्णुते
02090273 तथा तद्विषयां धेहि मनीषां मयि माधव

02090281 भगवच्छिक्षितम् अहं करवाणि ह्यतन्द्रितः
02090283 नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात्
02090291 यावत् सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भो जनम्
02090293 अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदो ऽज मानिनः
0209030 श्रीभगवान् उवाच
02090301 ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम्
02090303 सरहस्यं तदङ्गं च गृहाण गदितं मया
02090311 यावान् अहं यथाभावो यद्रूपगुणकर्मकः
02090313 तथैव तत्त्वविज्ञानम् अस्तु ते मदनुग्रहात्
02090321 अहम् एवासम् एवाग्रे नान्यद्यत् सदसत् परम्
02090323 पश्चादहं यदेतच् च योऽवशिष्येत सोऽस्म्यहम्
02090331 ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि
02090333 तद्विद्यादात्मनो मायां यथाभासो यथा तमः
02090341 यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु
02090343 प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्
02090351 एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः
02090353 अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा
02090361 एतन् मतं समातिष्ठ परमेण समाधिना
02090363 भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्
0209037 श्रीशुक उवाच
02090371 सम्प्रदिश्यैवम् अजनो जनानां परमेष्ठिनम्
02090373 पश्यतस्तस्य तद्रूपम् आत्मनो न्यरुणद्धरिः
02090381 अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः
02090383 सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत्
02090391 प्रजापतिर्धर्मपतिरेकदा नियमान् यमान्
02090393 भद्रं प्रजानाम् अन्विच्छन्न् आतिष्ठत् स्वार्थकाम्यया
02090401 तं नारदः प्रियतमो रिक्थादानाम् अनुव्रतः
02090403 शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च
02090411 मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः
02090413 महाभागवतो राजन् पितरं पर्यतोषयत्
02090421 तुष्टं निशाम्य पितरं लोकानां प्रपितामहम्
02090423 देवर्षिः परिपप्रच्छ भवान् यन् मानुपृच्छति
02090431 तस्मा इदं भागवतं पुराणं दशलक्षणम्
02090433 प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत्
02090441 नारदः प्राह मुनये सरस्वत्यास्तटे नृप

02090443 ध्यायते ब्रह्म परमं व्यासायामिततेजसे
02090451 यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम्
02090453 यथासीत् तदुपाख्यास्ते प्रश्नान् अन्यांश्च कृत्स्नशः

Chapter 10

दशलक्षणकथनम्

0210001 श्रीशुक उवाच
02100011 अत्र सर्गो विसर्गश्च स्थानं पोषणम् ऊतयः
02100013 मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः
02100021 दशमस्य विशुद्ध्यर्थं नवानाम् इह लक्षणम्
02100023 वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा
02100031 भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः
02100033 ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः
02100041 स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः
02100043 मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः
02100051 अवतारानुचरितं हरेश्चास्यानुवर्तिनाम्
02100053 पुंसाम् ईशकथाः प्रोक्ता नानाख्यानोपबृंहिताः
02100061 निरोधोऽस्यानुशयनम् आत्मनः सह शक्तिभिः
02100063 मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिः
02100071 आभासश्च निरोधश्च यतोऽस्त्यध्यवसीयते
02100073 स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते
02100081 योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः
02100083 यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः
02100091 एकम् एकतराभावे यदा नोपलभामहे
02100093 त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः
02100101 पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः
02100103 आत्मनोऽयनम् अन्विच्छन्न् अपोऽस्राक्षीच् छुचिः शुचीः
02100111 तास्ववात्सीत् स्वसृष्टासु सहस्रं परिवत्सरान्
02100113 तेन नारायणो नाम यदापः पुरुषोद्भवाः

02100121 द्रव्यं कर्म च कालश्च स्वभावो जीव एव च
02100123 यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया
02100131 एको नानात्वम् अन्विच्छन् योगतल्पात् समुत्थितः
02100133 वीर्यं हिरण्मयं देवो मायया व्यसृजत् त्रिधा
02100141 अधिदैवम् अथाध्यात्मम् अधिभूतम् इति प्रभुः
02100143 अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच् छृणु
02100151 अन्तः शरीर आकाशात् पुरुषस्य विचेष्टतः
02100153 ओजः सहो बलं जज्ञे ततः प्राणो महान् असुः
02100161 अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्वजन्तुषु
02100163 अपानन्तम् अपानन्ति नरदेवम् इवानुगाः
02100171 प्राणेनाक्षिपता क्षुत् तृडन्तरा जायते विभोः
02100173 पिपासतो जक्षतश्च प्राङ् मुखं निरभिद्यत
02100181 मुखतस्तालु निर्भिन्नंजिह्वा तत्रोपजायते
02100183 ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते
02100191 विवक्षोर्मुखतो भूम्नो वह्निर्वाग् व्याहृतं तयोः
02100193 जले चैतस्य सुचिरं निरोधः समजायत
02100201 नासिके निरभिद्येतां दोधूयति नभस्वति
02100203 तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः
02100211 यदात्मनि निरालोकम् आत्मानं च दिदृक्षतः
02100213 निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः
02100221 बोध्यमानस्य ऋषिभिरात्मनस्तज् जिघृक्षतः
02100223 कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः
02100231 वस्तुनो मृदुकाठिन्य लघुगुर्वोष्णशीतताम्
02100233 जिघृक्षतस्त्वङ् निर्भिन्ना तस्यां रोममहीरुहाः
02100235 तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणो वृतः
02100241 हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया
02100243 तयोस्तु बलवान् इन्द्र आदानम् उभयाश्रयम्
02100251 गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम्
02100253 पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः
02100261 निरभिद्यत शिश्नो वै प्रजानन्दामृतार्थिनः
02100263 उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम्
02100271 उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्
02100273 ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः
02100281 आसिसृप्सोः पुरः पुर्या नाभिद्वारम् अपानतः
02100283 तत्रापानस्ततो मृत्युः पृथक्त्वम् उभयाश्रयम्
02100291 आदित्सोरन्नपानानाम् आसन् कुक्ष्यन्त्रनाडयः

02100293 नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये
02100301 निदिध्यासोरात्ममायां हृदयं निरभिद्यत
02100303 ततो मनश्चन्द्र इति सङ्कल्पः काम एव च
02100311 त्वक्चर्ममांसरुधिर मेदोमज्जास्थिधातवः
02100313 भूम्यप्तेजोमयाः सप्त प्राणो व्योमाम्बुवायुभिः
02100321 गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः
02100323 मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी
02100331 एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया
02100333 मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्
02100341 अतः परं सूक्ष्मतमम् अव्यक्तं निर्विशेषणम्
02100343 अनादिमध्यनिधनं नित्यं वाङ्मनसः परम्
02100351 अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते
02100353 उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः
02100361 स वाच्यवाचकतया भगवान् ब्रह्मरूपधृक्
02100363 नामरूपक्रिया धत्ते सकर्माकर्मकः परः
02100371 प्रजापतीन् मनून् देवान् ऋषीन् पितृगणान् पृथक्
02100373 सिद्धचारणगन्धर्वान् विद्याध्रासुरगुह्यकान्
02100381 किन्नराप्सरसो नागान् सर्पान् किम्पुरुषान् नरान्
02100383 मात् रक्षःपिशाचांश्च प्रेतभूतविनायकान्
02100391 कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहान् अपि
02100393 खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीसृपान्
02100401 द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः
02100403 कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः
02100411 सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः
02100413 तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा
02100415 यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते
02100421 स एवेदं जगद्धाता भगवान् धर्मरूपधृक्
02100423 पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरादिभिः
02100431 ततः कालाग्निरुद्रात्मा यत् सृष्टम् इदम् आत्मनः
02100433 सन्नियच्छति तत् काले घनानीकम् इवानिलः
02100441 इत्थम्भावेन कथितो भगवान् भगवत्तमः
02100443 नेत्थम्भावेन हि परं द्रष्टुम् अर्हन्ति सूरयः
02100451 नास्य कर्मणि जन्मादौ परस्यानुविधीयते
02100453 कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत्
02100461 अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः
02100463 विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः

02100471 परिमाणं च कालस्य कल्पलक्षणविग्रहम्
02100473 यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पम् अथो शृणु
0210048 शौनक उवाच
02100481 यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः
02100483 चचार तीर्थानि भुवस्त्यक्त्वा बन्धून् सुदुस्त्यजान्
02100491 क्षत्तुः कौशारवेस्तस्य संवादोऽध्यात्मसंश्रितः
02100493 यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वम् उवाच ह
02100501 ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम्
02100503 बन्धुत्यागनिमित्तं च यथैवागतवान् पुनः
0210051 सूत उवाच
02100511 राज्ञा परीक्षिता पृष्टो यदवोचन् महामुनिः
02100513 तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः